त्से इमे अपि प्रदेये॰ न युक्तमनयोस्तत्र गन्तुं · त्वया सह गौतमी यास्यति॰ श॰ पितारं आश्लिष्य
कहं दाणिं तादस्स॰ अंकादो परिभ्भ[illegible]ः । मलअतरुम्मूलि आ चंदणलदेव्व देसंतरे जीविअं॰ धारे हैं॰ ३८

द्दस्सं० का० वत्से किमेवं कातरासि० अनभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे विभवगुरु
भि॰ कृत्ये तस्य प्रतिक्षणमाकुला॰ तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं मम विरहजां न त्वं व
त्से शुचं गणयिष्यसि॰१३ श० पितुः पादयोः पतति॰ का० यदिच्छामि ते तदस्तु० श० सख्यावु
पेत्य० हला दुवेवि मं सं अंजेच्च परिस्सजह॰ स० सख्यौ॰ तथा कृत्वा॰ सहि जइ णाम सो॰ राजा॰ पच्चभि
ण्णाणमंथरो भवे तदो से इमं अत्तणामहेअअंकिअं॰ अंगुलीअअं॰ दंसेहि॰ श० इमिणा सं
देसेण वो आअंपिदह्मि॰ उ० मा भाहि सिणेहो पावसंकी॰ शा० युगान्तरमारूढः सविता
त्वरतां भवती॰ श० आश्रमाभिमुखी स्थित्वा॰ ताद कदा णु भूओ तवोवणं पेक्खिस्सं॰ का०

श॰ ना॰ श्रूयतां॰ भूत्वा चिराय चतुरंतमहीसपत्नी दौष्यंतिमप्रतिरथं तनयं निवेश्य॰ भर्त्रा तदर्पितकुटुं
३९ बभरेण सार्धं शांते करिष्यसि पदं पुनराश्रमेस्मिन्॰ १४॥ गौ॰ जादे॰ परिहीअदि गमणवेला
39 त्ति वत्तेहि॰ पिदरं अहवा चिरेण विपुंणो पुणो एसा एव्वं मे तद्दस्स दिन्ति वत्ते दुमवं॰ वत्से उ
परुध्यते तपोनुष्ठानं॰ श॰ भूयः पितरमाश्लिष्य॰ तव च्चरणपीडिदं॰ ताद सरीरं नाम अ
दिमेतं मम किदे॰ उत्कां॰ दि॰ का॰ सनिश्वासं॰ शममेष्यति मम शोकः कथं नु वत्से त्वयारचि
तपूर्वं॰ उटजद्वाररविरूढं नीवारबलिं विलोकयतः॥१५॥ गच्छ शिवास्ते पंथानः संतुः निष्क्रां
ता शकुंतला सहयायिनश्च॰ सख्यौ॰ शकुंतलां विलोक्य॰ हद्धी हद्धी अंतलिहिदा सउंदला हेरंबं॰
३९

वणराइए॰ काश्य॰ सनिश्वासं॰ अनसूये गतवतीवां सधर्मचारिणीनिगृह्य शोकमनुगच्छ
तं॰ उभे॰ ताद॰ सउंदलाविरहिदं॰ सुण्णंविअ॰ तवोवणं॰ कहं॰ पविसामो॰ का॰ स्नेहप्रवृत्तिरेवं
दर्शनी सविमर्शं परिक्रम्य हंत भोः शाकुंतलां पतिकुलं विसृज्य लब्धमिदानीं स्वस्थ्यं॰ कुतः॰
अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः॰ जातो ममायं विशदः प्रकामं प्रत्यर्पि
तन्यास इवांतरात्मा॥९६॥ ॥ इति निष्क्रांताः सर्वे शकुंतलायां चतुर्थोऽकः॥४॥ ॥ ॐ॥ ततः प्रवि
शत्यासनस्थो राजा विदूषकश्च॰ विकर्णं दत्वा॰ भोभो वअस्स॰ संगीदसालंतरे॰ अवधाणं
देहि॰ कलविसुद्धाए॰ गिदीए॰ सुरसंजोओ सुणीअदि॰ जाणे तत्तहोदी हंसपादिआवि

श·वुं० णा० परिअअं करेदि त्ति · राजा तूष्णीं भवः यावदाकर्णयामि · आकाशे गीयते · अहिणवमहु
६० लोलुवो तुमं तह परिचुंबिअ चूदमंजरिं कमलवसइमेत्तणिव्वुदो महुअर विह्मरिदो सि णं कहं ·
राजा · अहो रागपरिवाहिनी गीतिः · वि० किं दावगीए० अवगादो अक्खरत्थो · राजा · अवगतं कृ
५० ता · सकृत्कृतप्रणयोयं जनः · तदस्याः देवीं वसुमतीं अंतरेण यदुपालंभमेव गतोस्मि ·
सखे माढव्य मद्वचनादुच्यतां हंसपादिका · निपुणमुपालब्धोस्मीति · विदू० जं भवं आणा
वेदी · उत्थाय० भो वअस्स · गहिदस्स तए · परकीएहिं हत्थेहिं · सिहंडए · ताडिअमाणा
स्स · एत्तलाए० वीदराअस्स · विअ० णत्थि · दाणिं · मे० मोक्खो · राजा · गच्छ नागरिकवृत्या हेरंबं०
६०

संज्ञापयैनां॰ वि॰ कागई॰ निष्क्रांत राजा॰ आत्मगतं॰ किं नु खलु गीतमाकर्ण्य इष्टजनवियोगादृ
तेपि॰ बहलं उत्कंठितो।स्मि॰ अथ वा रम्या।पि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुकीभव
ति यत्सुखितो।पि जंतुः॰ तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननांतरसौहृदानि
॥१॥ पर्याकुल।स्तिष्ठति॰ ततः प्रविशति कंचुकी॰ कंचुकी॰ अहो नु खल्वीदृशीमवस्थां प्रपन्नो
।स्मि॰ आचार इत्यवहितेन मया गृहीता या वेत्रयष्टिरवरोधगृहेषु राज्ञः॰ काले गते बहुति
थे मम सैव जाता प्रस्थानविक्लवगतेरवलंबनार्था २ भोः कामं धर्मकार्यमनतिपात्यं देवस्य
तथापीदानीमेव धर्मासनादुत्थितस्य पुनरुपरोधकारि कण्वशिष्यागमनमस्मै निवे

शन्ना० दिनं नोत्सहे · अथवा० अविश्रमोयं लोकतंत्राधिकारः · कुतः · भानुः सकृद्युक्ततुरंग एव रात्रिंदि
४१ वं गंधवहः प्रयाति० शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥४॥ यावन्नियो
४१ गमनुतिष्ठामि परिक्रम्यावलोक्य च० एष देवः प्रजाः प्रजाः स्वा इव तंत्रयित्वा निषेवते शां
तमनाविविक्तं स्थानिमं चार्थरविपन्नतः शीतं द्विपांश्छानमिव द्विपेंद्रः ॥५॥ उपगम्य जयतु
जयतु देवः एते खलु हिमवतो गिरेरुपत्यकारण्यवासिनः काश्यपसंदेशमादाय सस्त्रीकास्त
पस्विनः संप्राप्ताः श्रुत्वा देवः प्रमाणं · राजा सादरं किं काश्यपसंदेशहारिणः · कंचुकी · अथ
किं · राजा तेन हि मद्वचनाद्विज्ञाप्यतां उपाध्यायः सोमरातः अमूनाश्रमवासिनः श्रौतेन वि हरबं० ४१

धिनासन्कृत्स स्वयमेव प्रवेशयितुमर्हति· अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रति
पालयामि· कं॰ यदाज्ञापयति देवः· इति निष्क्रान्तः राजा उत्थाय· वेत्रवति अग्निशरणमार्ग
मादेशय· प्रतिहारी॰ इदो इदो देवः राजा परिक्रामति· अधिकारखेदं निरूप्य· सर्वः प्रार्थि
तमर्थमधिगम्य सुखी संपद्यते जंतुः॰ राज्ञां तु चरितार्थता दुःखोत्तरैव॰ औत्सुक्यमात्र
मवसाययति प्रतिष्ठा। क्लिश्नाति लब्धपरिपालनवृत्तिरेनं॰ नातिश्रमापनयनाय नच श्र
मापनयनायनत्वा श्रमाय राज्यं स्वहस्तधृतदंडमिवातपत्रं ५ नेपथ्ये· वैतालिकौ॰ विज
यतां देवः॰ प्रथमः॰ स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः प्रतिदिनमथवा ते वृत्तिरे

शा॰ना॰ वंविधैव॰ अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमयति परितापं छायया संश्रितानां ॥६॥ द्वितीयः
६२ नियमयसि कुमार्गप्रस्थितानात्तदंडः प्रशमयसि विवादं कल्पसे रक्षणाय: अतनुषु विभवेषु
६२ ज्ञातयः संतु नाम त्वयितु परिसमाप्तं बंधुकृत्यं प्रजानां ॥७॥ राजा॰ एते क्लांतमनसः पुनर्नवी
कृताः स्मः॰ परिक्रामति॰ प्रतीहारी॰ अहिणव संमज्जणसस्सिरीओ॰ संणिहिदहोमधेणू॰ अ
ग्गिसरणालिंदो॰ आरुहदु देवो॰ राजा आरुह्य परिजनांसावलंबी तिष्ठति॰ वैत्रवति किमु
द्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः॰ किंतावद्व्रतिनामुपोढतपसां
विघ्नैस्तपो दूषितं धर्मारण्यचरेषु केन विकृतं प्राणिष्वसच्चेष्टितं॰ आहोस्वित्प्रसवो ममाप हर॰बं॰ ६२

चरितैर्विघ्नं।भितो वीक्ष्यामि सान्द्रत्व ऊ प्रतर्कमपरिच्छेदाकुलं मेमनः ॥८॥ प्रतीहारी॰ सुअ
रिद॰ नंदिणो॰ इसिओ॰ देवं सभाजायिदुं आअदे त्ति तक्केमि॰ ततः प्रविशंति गौतमीस
हिताः शकुंतलां पुरस्कृत्य मुनयः॰ पुरश्चैषां कंचुकी पुरोहितश्च॰ कंचुकी॰ येन पुरोहितः इ
त इतो भवंतः शार्ङ्ग॰रवः शारद्वतः महाभागाः कामं नरपतिरभिन्नस्थितिरहो न कश्चिद्वर्णा
नामपथमपकृष्टोपि भजते॰ तथापीदं शश्वत्परिचितविविक्तेन मनसा जनाकीर्णंम
न्ये हुतवहपरीतं गृहमिव॰ ॥१०॥ शारद्वतः॰ जाने भवान् पुरप्रवेशादित्थंभूतः संवृत्तः अहम
पि॰ अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तं॰ बद्धमिव स्वैरगतिर्जनमिह सुखा

शा.ना॰ संगेन मवैमि॰ ॥१०॥ शा॰ निमित्तं सूचयित्वा· अम्महे॰ किं मे· वामेदरं॰ णअअणं· विप्फुरदि· गोद
४२ मी· जादे॰ पडिहदम मंगलं: सुहाइं· दे· भत्तुकुलदेवताओ· वितरंदु॰ परिक्रामति॰ पुरोहितः· राजा
नं निर्दिश्य भो तपस्विनः॰ असावत्रभवान्‌ वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपाल
४३ यति· पश्यतै· शार्ङ्गरवः· भो महाब्राह्मण काममेतदभिनंदनीयं· तथापि वयमत्र मध्यस्थाः
कुतः· भवंति नम्रास्तरवः फलागमै नानांबुभिर्भूमिविलंबिनो घनाः· अनुद्धताः सत्पुरुषाः
समृद्धिभिः स्वभाव एवैष परोपकारिणां· ॥१२॥ प्रतीहारी· देवपसण्णमुहवण्णा दीसंति· जा
णामि· विस्सद्धकज्जा· इसीओ· राजा· शकुंतलां दृष्ट्वा अथात्रभवती· कास्विदवगुंठनवती हेरंब·
४३

नातिपरिस्फुटशरीरलावण्या माध्येतपोधनानां किसलयमिव पांडुपत्राणां ॥१२॥ प्र॰ देव कुदूहलग
ब्भो·पहिदो·नमे तक्को पसरदि·णं·दंसणीया·उणा·से·आकिदी लक्खीअदि: भवतु अनिर्वर्ण्यं नी
यं परकलत्रं· शकुं॰ हस्तमुरसि कृत्वा· आत्मगतं· हिअअ· किं एव्वं वेवसि· अज्ज उत्तस्स भावं ओ
हारिअ· अधीरं· दाव होहि: पुरोहितः· एते विधिवदर्चितास्तपस्विनः कश्चिदेषामुपाध्यायसं
देशः तं देवः श्रोतुमर्हति· राजा· अवहितोस्मि· ऋषयः हस्तमुद्यम्य विजयस्व राजन्: राजा सर्वा
नभिवादये॰ ऋषयः॰ इष्टेन युज्यस्व॰ राजा· अपि निर्विघ्नतपसो मुनयः· ऋषयः कुतो ध
र्मक्रियाविघ्नः सतां रक्षितरि त्वयि· तमस्तपति घर्मांशो कमाविर्भविष्यति ॥१३॥ राजा· अर्थ

शा॰ना॰ वानुरवलुप्तमराज्ञशब्दः॰ अथ भगवान् लोकानुग्रहाय कुशली काश्यपः॰ ऋ॰ स्वाधीनकुशलाः
६७ सिद्धिमंतः॰ स भवंतमनामयपूर्वकमिदमाह॰ राजा॰ किमाज्ञापयति भगवान्॰ शार्ङ्गरवः॰ यन्मिथः
५५ समयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातं कुतः॰ त्वमर्हतां
प्राग्रसरः स्मृतो सि यच्छकुंतला मूर्तिमती व सत्क्रियाः समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं
न गतः प्रजापतिः॥१६॥ तदिदानीमापन्नसत्वा प्रतिगृह्यतां सह धर्मो च रणायेति॰ गौतमी॰
अज्ज किंपि वत्तुकामा ह्मि सं वुत्ता ए॰ मे॰ वा अएा व सरो त्थि॰ कहं पि॰ एा पे॰ क्खिदो॰ गुरुअएो॰ इ
माए॰ लुए वि॰ एा॰ डु पुच्छिदो॰ बंधुजएो॥ एक्कक्कस्स चरिए॰ किं भएामि॰ एक्कक्कस्स॰ शा॰ आत्म हेरंब॰ ६७

गमी किं एदु · खु · अज्जउत्तो · भणादि · राजा · किमिदमुपन्यस्तं · श · पाव जी · खु · व अणोवअणो
सि · शार्ङ्ग रवः · कथमिदं नाम भवत एव सुतरां लोकवृत्तांतनिष्णाताः · सतीमपि ज्ञातिकुलैकसंश्र
यां जनो न्यथा भर्त्तृमतीं विशंकते · अतः समीपे परिणेतुरिष्यते तदप्रियापि प्रमदा स्वबंधुभि
॥५॥ राजा · किं चात्र भवती मया परिणीतपूर्वा · श · सविषादम् आत्मगतं · हि अअ संपदं ते आसं
का · शार्ङ्ग · किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा · राजा · कुतोयमसत्कल्पनाप्रश्नः ·
शार्ङ्ग · मूर्छंत्यमी विकाराः प्रायेणैश्वर्यमत्तेषु · राजा · विशेषेणाधिक्षिप्तोस्मि · गोतमी · जादे ·
मुहुत्तं अं · मा · लज्ज स्स · अवणइस्सं · दाव दे अवगुंठणं · तदो तुमं · भट्टा अभिजाणिस्सदि · य

शा·ना॰ योत्कं करोति· राजा· शाकुंतलां निर्वर्ण्यात्मगतं॰ इदमुपनतमेवं तत्समक्लिष्टकांति प्रथमपरिगहीतं
४५ स्यान्नवेति व्यवस्यन्॰ भ्रमर इव विभाते कुंदमंतस्तुषारं नखलु च परिभोक्तुं मैव शक्नोमि हातुं॥८॥
45 विचारयन् स्थितः· प्रतीहारी· अहो धंमापेक्खिदा भट्टिणो· ईदिसं· णाम· सुहोवाणदं· रूवं· दे
रिख अ॰ को· अण्णोवि आरोदि· शा॰ भो राजन्नू किमिति जोषमास्यते· राजा· भोस्तपस्विनः॰ चिंत
यन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि· तत्कथमिमामभिव्यक्तसत्वलक्षणां प्रत्यात्मा
नं क्षेत्रिणमाशंकमानः प्रतिपत्स्ये· शा॰ अज्जउत्तस्स· परिणए ज्जेव· संदेहो· कुदो दाणिं मे दूराधि
रोहिणी· आसा· शा· मा तावत्· कृताभिमर्शामभिमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः· मुष्टं हेरंब॰
४५

प्रतिग्राह्य तया स्वमर्थं पात्री कृतो दस्युरिवासि येन ॥१७॥ शारद्वतः· शार्ङ्गरव विरम त्वमिदानीं। श
कुंतले वक्तव्यमुक्तमस्माभिः सोयमत्रभवानेवमाह दीयतामस्मै प्रत्ययप्रतिवचनं· श· अपवा
र्य· इमं अवत्थंतरं· गदे· तारिसे· अणुराये· किं वा· सुमराविदेण· अत्ता· दाणीं· मे· सोअणीओ· त्ति व
वसिदं· प्रकाशं· इज्जउत्त· इ सर्थानेः ससइदे· परिणाये· ण· एस· समुदाआरो· पोरव· ण· ते· जुत्तं·
णा· म· तह· पुरा· अस्समपदे· सहावुत्ताणहिअअं· इमं· जणं· समअपुव्वं· पतारिअ· ईदी
सेहिं· अक्खरेहिं· पच्चाचक्खिदुं· राजा· शांतं पापं· व्यपदेशमाविलयितुं किमीहसे जनमिमं च
पातयितुं· कूलंकषेव सिंधुः प्रसन्नमंभस्तटतरुं च· शकुंतला· होदु· जइ· परमत्थदो· पर

शा·ना० परिग्रहसं किं पुणं तुए· एद्धं० प उत्तं· ता· अहिण्णाणो पाः० इमिणा· तुह्न० आसंके० अवणइस्सं· राजा
४६ उदारः कल्पः० शा० मुद्दास्थानं परामृश्य· हद्धी· अंगुलीअअ· सुण्णा मे अंगुली सविषादं· गोतमी·
एत्तं· दे· सक्कावदारब्भंतरे· सचीतीत्थसलिलं वंदमाणाए· पब्भट्ठं अंगुलीअअं राजा०
५८ सास्मितं· इदं प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते· शा· एत्थं· दाव· विहिणा· दंसिदं· पहुत्तणं· अ
वरं देक्कहिस्सं राजा· श्रोतव्यमिदानीं संवृत्तं· शा० णं· एक्कस्सिं दिअहे· णोमालिआमंडवे· ण
लिणीपत्तभाअणगअं· उदअं· तव हत्थे· संणिहिदं० आसि· राजा· शृणुमस्तावत्० शा०
तक्खणं· सो· मे· पुत्तकिद्दवो· दीहापांगो· णाम मिअपोदओ· उवात्थिदो· तुए· अअं दा हेरंब०
४६

व·पच्छमं॰ पि अउत्ति·९ अणुअं पि णाः उवाल्थिं दिट्ठो· अउएणा·उण·दे·अपरिच्चयाद्दो· अत्थम्भा
सं· उवागद्दो·पच्छ्या तस्मिन् एव्व·मए· गहिद्दे स लिले ण· कि द्दयणओ·लद्दालुमं·एत्थ उ पहवि
द्दो सि·स घो·सगंधे मु·विस्सस्सि दि·दुवे वि॰ एत्थ आरण्णओ त्ति·राजा·एवमाभिरात्मकार्यनिर्वर्त्ति
नीनां अनृतमयवाङ्·मधुभिरा कृष्यंते विषयिणः। गौतमी·महाभाअ· णारुहसि·एव्वं·मं
दिट्ठुं·तवोवणसंवड्ढिद्दो· अणभिण्णो अअं·जणो·कइद्दवस्स·राजा·तापसवृद्धे·स्त्रीणामशि
क्षितपटुत्वममानुषीषु संदृश्यते किमुतयाः प्रतिबोधवत्सः·प्रागंतरिक्षगमनात्स्वमपत्यजा
तमन्यैर्द्विजैः परभृताः खलु पोषयंति· ॥२०॥ श॰ सरोषं·अणज्ज·अत्तणो· हिअआणुमा

श·ना० लोण·पेरखसि·कोहलिं· जलोधम्म·वंचु अवेसि णो·तिणाढ न्न कूवो पमस्स·त्तवा एड किदिं पदि
६७ वदिसस्स दि॰राजा·आत्मगतं· संदिग्धबुद्धिं मां कुर्वन् नवौ नवदृवास्या: कोपो लक्ष्यते॰ तथाह्य
नया·मय्येवविस्मरणादारुणाचित्तवृत्तौ वृत्तेरहः प्रणयमप्रतिपद्यमाने·भेदाद्भुवोः कुटिल
५७ लयोरतिलोहिताक्ष्याभग्नं शरासनमिवातिरुषास्मरस्य॥१२॥प्रकाशं· भद्रे प्रथितं दुष्यंतस्य
चरितं·तथापीदं न लक्षये· श·भद्दु: दाव· अत्रसंक्षेहृच्चारिणी·किं दाणिं इन्ना· अहं इमस्स·पुरु
वंसप्पच्चएण·मुहमहुणो· हिअअ· ट्ठिअविसस्स॰ हस्य भ्भास·उवगदा·पटांतेन मुखमा
वृत्त्य रोदिति· शार्ङ्ग: इत्थमात्मकृतं परिहतं चापलं दहति॰ अतः परीक्ष्यकर्तव्यं विशेषात्संगतं हरिव०
६७

रहः·अज्ञातहृदयेष्वेवं वैरी भवति सौहृदं ॥१९॥ राजा· अयि भोः किमत्रभवतीग्रस्तपादे वास्मान्संयु
तदोषाक्षरेण क्षिपथ· शार्ङ्गः·स्वरूपं·श्रुतं भवाद्भिः अधरोत्तरं·आजन्मनः शाठ्यमशिक्षितो यस्त
स्याऽप्रमाणं वचनं जनस्य·परातिसंधानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः॥२०॥रा
जा·भोः सत्यवादिनः अभ्युपगतं तावदस्माभिः एवं किं पुनरिमामतिसंधाय लभ्यते·शा·वि
निपातः·पौरवैः प्रार्थ्यते इति न श्रद्धेयमेतत्· शारद्वतः·किमुत्तरेण अनुष्ठितो गुरोः संदेशः·प्र
तिनिवृत्तामहे वयं॰ राजानं प्रति॰ तदेषा भवतः कान्ता त्यज वैनां गृहाण वा॰ उपपन्ना हि दारेषु
प्रभुता सर्वतोमुखी॰२१॥ गौतमी॰ गच्छाग्रतः॰ प्रस्थिताः·शा·कु·हे·इमिणा·किदवेण·विप्पल

शा॰ना॰ इति॰ तुल्से॰ तुस्से वि॰मं॰ परिद्दे विगं॰ परिच्च अह॰ अनु प्रतिष्ठते॰ गौतमी॰ स्थिता॰ वत्स॰ संगरवः
९८ अणुगच्छ दिट्ठं॰ खु॰णो॰ करूणपरिद्देविणीस उं दृला॰ पच्चादेस परसे॰ भत्तुणि॰ किंवा मे॰ पु
48 त्ति आ॰ करिस्सदि॰ शा॰ ङ्गैः सरोषं॰ संनिवर्त्य॰ किं पुरोभाग स्वातंत्र्यमवलंबसे॰ श॰ भीता वेपते॰
शार्ङ्गः शकुंतले॰ यदि यथावदति क्षितिपस्तथा वदति क्षितिपस्तथा त्वमसि किं पितुरुत्कुलया त्व
या॰ अथ तु वेत्सि शुचिव्रतमात्मनः पतिकुले तव दास्यमपि क्षमं ।२२। तिष्ठ साधयामो वयं॰ राजा॰
भो स्तपस्विन् किमत्र भवंती विप्रलंभसे॰ कुमुदान्येव शशांकः सविता बोधयति पंकजान्येव॰
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ।२३। शा॰ यदा तु पूर्ववृत्तमन्यसंगाद्विस्मृतो हेरंब॰ ९८

भावान्॰ तदा कथमधर्मभीरुः राजा· भवंतमेवात्र गुरुलाघवं पृच्छामि॰ मूढः स्यामहमेषा वा वदे
न्मिथ्येति संशये· दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ।२४॥ पुरोहितः· विचार्य यदि ता
वदेवं क्रियतां॰ राजा· अनुशास्तु मां भवान्· पु॰ अत्र भवती तावदाप्रसवात् अस्मद्गृहे तिष्ठ
तु· कुत इदमुच्यत इति चेत्· त्वं साधुभिरुद्दिष्टः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति स
चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति· अभिनंद्य शुद्धांतमेनां प्रवेशयिष्यसि॰ विप
र्यये तु पितुरस्याः समीपनयनमवस्थितमेव॰ राजा· यथा गुरुभ्यो रोचते· पु॰ वत्से अनुगच्छ मां·
श॰ भगवति वसुधे· देहि मे विवरं· रुदती प्रस्थिता· निष्क्रांता सह पुरोधसा सह तपस्विभिश्च·

शा॰ना॰ ६९ ५९

राजा॰ शापव्यवहितमतिः शकुंतलागतमेवं चिंतयति॰ नेपथ्ये॰ आश्चर्यं २ राजा॰ किंमेवं प्रविश्य पु॰ दे
व परावृत्ते पुरुषक एव शिष्येषु॰ सा निंदंती स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रंदितुं च प्रवृत्ता॰ राजा॰ किं
च॰ पु॰ स्त्रीसंस्थानं चाप्सरस्तीर्थमारादुत्क्षिप्यैनां ज्योतिरेकं जगाम॥२५॥ निरो भूतेस र्वे विस्मयं
रूपयंति॰ राजा॰ भगवन्प्रागपि सोस्माभिरर्थः प्रत्यादिष्ट एव॰ किं वृथा तर्केणान्विष्यते विश्राम्य
तु भवान्॰ विलोक्य विजयस्वेति निष्क्रांतः राजा॰ वेत्रवति पर्याकुलोस्मि शयनभूमिमार्गमादे
शय॰ प्रती॰ इत इतो देवो प्रस्थितः॰ राजा॰ कामं प्रत्यादिष्टं स्मरामि न परिग्रहं मुनेस्तनयां॰ बलव
त्तु दूयमानं प्रत्याययतीव मे हृदयं॥२६॥ ॥इति निष्क्रांताः सर्वे पंचमोंकः॥५॥ ततः प्रविशति ना हेरंब॰ ६९

गरिकः शालः ॰ पश्चाद्बद्धं पुरुषमादाय राज्ञि लोच· ताडुपिला॰ अलो· कुंभील कःवहे हिं॰ कहिं लु
ए· एशोमलि बंधलु क्लिषलामहे अ अंकिदे॰ ला अकीअए· अंगुलीअए· शमाशा दिए· पु
रुषः· भीलिं नाटितिकेन· पशीदते· भावामि शशो· अहके ए· ईदिश कम्मकाली· प्रथमः· किं· स्वु· शो
हलो· ब्रह्मएोत्ति· काल्लि अ॰ रला पाडि गाहे दिलो· पुरुषः सु एथहालं· अहके· श क्कावदाल
ष्मां तलवाशी· धावले· द्वितीयः· पाटच्चल· किं· अह्ये हिं· जादीपुच्छिदे· शालः स्वच्च अ· कहेदु· मद्धं
अल्ल क्कमेलमा· लं· अंतरा· पडि बंध ह· उमौ· जं· आवुत्तोआल वेदि· कहोहि· पुरुषः अह
के· जालुग्गलादिहिं· मच्छ वंधलोवाए हिं· कुडुंबमल लं· कलेमि· शालः॰ विहस्य विस्मुद्धदा

शा॰ना॰ त्तिं॰ आजीवे॰ पुरुषाः॰ भट्टाः शहजे॰ किलजे॰ विएंदि ए॰ एाडुदे॰ कं मज्ज्ञा विवज्जएा अवे। पम्मुमाल्ल
५० नसमदाउली अलुकं पामृदु एव शोत्तिए॰ ॥१॥ शाल्लः नदो नद्दो॰ पुरुषः॰ एक्कु शिंदि असे॰ खंडशोल्लो
50 हिअ मच्छेमए॰ कल्लिदो जाव॰ नरश उदुल भ्भं लल्ले॰ उद्दं॰ लक्ष एां॰ भाम्नुलं अंगुली अअं॰ दोरवि अं॰
पच्छा॰ अह के॰ शे॰ विक्कवश्शा॰ देश अंनेगहिद्दे भावमि श्शेहिं॰ गहिद्दे मालेह॰ वा॰ मुच्चे हवा॰ अअंशी॰ आ
अमवुत्तंते॰ शाल्लः॰ जाएदु अ॰ विश्शागंधी॰ गोहादीत्त॰ मच्छनेधो एव॰ एिसं अं॰ अंगुली अंअ॰ दंसएां शे
वि मरिसि दव्वं॰ लाउक्कं॰ एव॰ गच्छा मो॰ रक्खिलो॰ तह॰ शाल्लः गच्छ॰ अले॰ गंडुमेदअ सर्वे परिक्कामं हेरवं॰
त्ति॰ शाल्लः सच्च अ॰ द्दमं॰ गोपुल॰ दुवाले॰ अपमत्ता॰ पडिबालेह॰ जाव इमं॰ अंगुली अअं॰ नहाग ५०

मणं·भादिणो·णिवीदिअ·तदोसासणे·पडिह्लिअ·णिक्कमामि·उभौ·पविशदु·आवुत्तो·मामिप
शाद्दश्श·निष्क्रांतः शालः·प्रथमः० जाएदु अ·चिरा अदि॰ आवुत्तो·द्वितीयः·णं·अवसलोपसप्पली
आ·ला आणी·प्रथमः·जाएदु अ·फुल्लन्ति॰ मे·हत्था·कुमशणः·वहश्शः·शुमणो·पिणद्धुं·पुरुषं नि
र्दिशति·पुरुषः॰ नाहृहदि·भावे·अकालएणे·मालएणे भविदुं॰ द्वितीयः·विलोक्य·एशे·अह्लाणं॰
शामी·पत्तहत्थे·लाअशाशणं·पडिह्लिअ॰ इदो·मुहं॰ देस्सवी अदि॰ गिन्धबली·ऊविश्शासि·अ्
णो·मुहोवा·देरिख श्शासि·प्रविश्य शालः·शालः·शिग्घं२ पुरुषः·भयं नाटयति·शालस्सूच अ·मुंचे
दु·एसो·जालो अज्जीवी·उवबलो·चिम्ल·अअं·अंगुलीअअस्स·आअमो·स्सूचकाः जहआवु

श्री·नां० तो·भणादि० जानुकः·एशे जमशादएणं० पविशिअ० पडिएिअ० पडिणिवुत्ते· पुरुषं परिमुक्तबंधनं
५१ करोति· पुरुषः शालं प्रणम्य· भट्टा· अहं· कीलिशे० मे आज्ञीवे· शालः० एसो भट्टिएण· अंगुलीअअ०
51 मुल्ल सम्मिद्दो पसादो विं० दावि दो० पुरुषायार्थे प्रयच्छति· पुरुषः· सप्रणामं परिगह्य· भट्टके· अण
गाहिदलिस्सूचकः·एशेणाम· अणुग्गहे·जे श्शलादो· अवशालिअ· हत्थिकंधे· पडिट्ठाविदे·जा
नुकः आउत·पडितोशं कहेहि· तेण अंगुलीअएण· भट्टिणो शंमे देएण० होदव्वं·शालः० एतस्सि
म रूहाकूहं० रअणं·भट्टिणो० बहुमदंत्ति तक्केमि· तस्स·दंसणेण· भट्टिणो अभिमदो जणो०
जुमरिद्दो० मुहुत्तअं पक्किदिगंभीरो० वि· पज्जसुअणअणो·आसि·सूचकः·शोविदं·णाम· आउ हरव० ५१

तेण · जाणुक :: एं भणाहि · इमस्स वा एण मस्थिआ · भत्तु णो · त्ति · पुरुषमस्सय पा पश्यति · पुरुषः भट्टालके ·
ईद्दो अत्थं० उज्झाणं० भुमणोः मुञ्चो होदु० जाणुक० एत्त के · जु ग्गइ · शालः० धीवरमहत्तरे तुमं · पि
अवअस्सको० द्दाणिं मेसंबुत्ते · कादंबरी · सखीअं · अह्माणं · पढमं · सोहिदं० इच्छी अदि० ताःसो
हिंड आवणं · एव्व गच्छामो०॥ इति निष्क्रांताः सर्वे तती यः प्रवेशकः॥ ततः प्रविशत्याकाशयानेन
सानुमती नामाप्सरः सानुमती · णिव्वत्तिदं · मये · पज्जाअं० णिवत्तणिज्जं · अत्थ रातीत्थसणि
ह्रं · जाव · साहु · जणस्स० अभिसेअ · कालो त्ति · संपदं · इमस्स० रायेसिणो · उद्देसं · पच्चक्खी
करिस्सं० मेणआ · संबंधेण · सरीरभूदा · दाणिं · मसउंदला · तए अ · दुहिदु · णिमित्तं आदिट्ठ

रा·ना० पुवस्सि·समंताद्दवलोक्य·कि·एत्तु·खु·रुदुच्छवे·वि·नि·रुसवारेभं·विनअ·एद्दं०राउ लदी सई।अत्थिमे·
५२ विद्दवो० पडि धाणिएणः सहं·परित्ताइुं० किं दुः सहीए·आद्दरो·मए० माणाइ्द्दवो·होदुः इमा एं·एव्वःउ
ज्झाएण पालि आपं० तिरक्करिणी·पडि च्छ एणःपस्स·परिवत्तिणी·भविअ० उवालि।भि स्सं·नाघेना
52 वती पं स्थिताः० ततः प्रविशति चूतांकुर मवलोकयंतीचेटी० अपरा चपष्ठतस्तस्याः प्रथमा·आ
आवे·हरि अपंडुरःवसंतः मासे क्कज्जीअ·सव स्सं·दिट्ठोसि·चूद·कोरअ·उदु·मंगलं·तुमं·पसा
एमि०२।द्वितीया·परऊदिए·किं·एआइ्ईणी·मंतेसि·प्रथमा·मडु अरिए०चूदकलिदं०दे।सखि
अ०ठम्मत्ति आ०परऊदिदि आ·होदि·द्वितीया·द्वितीया·सहर्षं तरयोपगम्य·कहं·उवट्ठिदो० हे·रं०
५२

महुमासो· प्रथमा· महुअरिए· लव·दाणिं· कालो· एसो· मद्दविब्भमगीदाणं· द्वितीया॰ सहि॰ अवलंब
मं· जाव· अग्गपादट्ठिआ· अविअ· चूदकलिअं· गेह्लिअ· कामदेवच्चणं· करेमि· प्रथमा· जइ· म
म॰ वि॰ खु अद्धं· अम्बफलस्स· द्वितीया· अ कहिदे· वि॰ एदं· संपज्जइ· जदो॰ एक्कं· एव्व णोज्जी
विदं· दुधा· ट्ठिदं· सरीरं· सलीमवलंम्बास्थिता· चूलांकुरं गह्लाति॰ अये· अप्पडिबुद्धो· वि· चूद
प्पसवो एस्स· बंधणभंगः सुरभी होदि॰ कपोलहस्त कंकणा॰ नुःसिम ए॰ चूदंकुर· दिण्णो· काम
स्स हिंगदं॰ धणुअस्स। पहिअ· जण· जुवई· लक्खो· पंचम्भहिओ· सरो· होहि॥३॥ चूलांकुरं
क्षिपति· प्रविश्यपटाक्षेपेण कुपितः कंचुकी कंचुकी· मानावद्दनाल्ल क्षेदेवै नप्रतिषिद्धे वसंतोत्स

श्री·ना° वेत्रमाम्रक।लिकरभं गंकिमारभसे·उभे भीने·पसीदद्दु·अ ज्जो अग्गाही दृत्या·व अं·कंचुकी·न वि
५३ ल श्रूतं स्तुवाभ्यां·पश्चासंतिकैर्केत्तरभिरपिरेव स्वशास नेत्रमाली कृतं तदा श्रयिभिः पश्चिभिश्च·त
थाहि·चूतानांचिरनिर्गतापिकलिकाबध्नाति न स्वंरजः सन्नद्धं यदपि स्थितं कुरबकं तत्कोरकाव
स्थया·कंठेषु स्खलितं गतेपि शिशिरे पुंस्कोकिलानां रुतं शंके संहरति स्मरोपि चकितस्तूणा ५३
र्धकृष्टं शरं॥६॥उभे·ण त्थि संदेहो·महप्पहावो·रायेसी·प्रथमा·अज्ज·कलिदि अहा·दृहाणं·
।नित्तावसुणाः रद्धि[?]णो महिणी° पाअम्र लं·पेसिदाणं·इत्थंच° णो·पमदवणस्स·पालेए·
कर्म्म° समाप्पदं·ता·आआ अंतु अद्दाए·अस्सुद° पुब्बो·अह्मो हिं·एसो वुत्तंतं·कंचुकी भव हेरंब°
५३

लुनपुनरेवंप्रवर्तितव्यं·उभे· अज्ज· को दूहलं ·णो जइ· दृमिला जणेण० सोदव्वं·कहेदु· अ जं· किंणिमि
त्तं· भट्टिणा· वसंतूस्सवे पडिसिद्धो· सानुमती· उस्सव· पिआ· खु· मणुस्सा· गुरुणा· कालणेण:
होदव्वं· कंचुकी० बहुली भूतमेतत्किं न कथ्यते· किमत्र भवत्योः कर्णपथं नायातं शकुंतलाप्र सा
दृशकौलीनं·उभे· सुदं· रट्ठि णो· मुहादो· जाव अंगुलीअअ· दंसणं ·कंचुकी· तेन ह्यल्पं कथयि
तव्यं ·यदैव खलु स्वांगुलीयकदर्शनादनुस्मृतं देवेन· सत्यमूढपूर्वो मया तत्रभवती रहसि शकुं
तला मोहात्प्रत्यादिष्टेति तदाप्रभृत्येव पश्चात्तापमुपागतो देवः तथाहि· रम्यं द्वेष्टि यथापुराप्र
कृतिभिर्नप्रत्यहं सेव्यते शय्याप्रान्तनिवर्तनैर्विगमयत्युन्निद्र एव क्षपाः· दाक्षिण्येन ददाति वाच

शा॰ ना॰ मुद्रितो मंत्रः पुरेभ्यो यदा गोत्रेषु स्खलति तस्तदा भवति च व्रीडाविलक्षश्चिरं ॥५॥ सानु॰ प्रियं मे॰ कंचुकी॰

५४ अस्मात्प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः॰ उभे॰ जुज्जइ॰ नेपथ्ये॰ एदु॰ एदु॰ भवं॰ कंचुकी कर्णं

दत्त्वा॰ अये इत एवाभिवर्त्ततेदेवः॰ स्वकर्मानुष्ठीयतां॰ उभे॰ तह॰ इति निष्क्रान्ते॰ ततः प्रविशति प

54 श्चात्तापसदृशवेषो राजा॰ विदूषकः प्रतिहारी च॰ कंचुकी॰ राजानमवलोक्य॰ अहो सर्वास्ववस्था

सु रमणीयत्वमाकृतिविशेषाणां॰ एवमुत्सुकोपि प्रियदर्शनो देवः॰ तथा हि॰ प्रत्यादिष्टविशे

षमंडनविधिर्वामप्रकोष्ठार्पितं बिभ्रत्कांचनमेकमेव वलयं श्वासोपरक्ताधरः॰ चिंताजाग

रणप्रताम्रनयनस्तेजो गुणादात्मनः संस्कारोल्लिखितो महामणिरिव क्षीणोपि नालक्ष्य हेरंब॰

५४

ते॰ हा सानुमती॰ राजानं दृष्ट्वा॰ ठाणे॰ खु॰ पच्चादेसविमाणिदा वि॰ इमस्स॰ किदे॰ सउंदला॰ किलम्मि
दि त्ति॰ राजा॰ ध्यानमंदं परिक्रम्य॰ प्रथमं सारंगाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तं॰ अनुशयदुः
खायेदं हतहृदयं संप्रति विबुद्धं ॥७॥ सा॰ली॰ णो॰ ईदिसाणि॰ तवस्सिणीए॰ भाअधेआणि॰ वि
दू॰ अपवार्य॰ लंघिदो एसो॰ भूः ओ॰ वि॰ सउंदला॰ वाहिणा॰ णा॰ आणे॰ कहं॰ चिकित्सिदव्वो॰
भविस्सदि॰ कं॰ चु॰ उपगम्य॰ जयतु देवः॰ महाराज प्रत्यवेक्षिताः प्रमदवनभूमयः॰ यथाकाम
मध्यास्तां विनोदस्थानानि॰ राजा॰ वेत्रवति मद्वचनादमात्यपिशुनं ब्रूहि॰ चिरप्रबोधना
न्न संभावितमस्माभिरद्य धर्मासनमध्यासितुं॰ यत्प्रत्यवेक्षितं पौरकार्यमार्येणा तत्रल्पव

श्री·ना० मारोप्पदीपत्तामिति· प्रतीहारी· जं· देवो· आणवेदित्ति निष्क्रांतः। राजा· वातायनतलमधिरुह्य नियोग
५५ मशून्यं कुरु· निष्क्रांत· कंचुकी· विदू० किं दं भवदा· णिम्मरिअं· संपदं· सिसिरालवच्छेदनदरम
णीए· इमास्सिं· पमदवणुद्देसे· अत्ताणं· रमयिस्सं सि० राज्ञा· वयस्यरंध्रोपनिपातिनो· नर्थाद्कृति
55 पडुच्यतंतद्व्यभिचारि वचश्च ·कुतः॰ मुनिसुताप्रणयस्मृतिरोधिना मम च युक्तमिदं तमसाम
नः मनसिजेन सखे प्रहरिष्पता धनुषि चूतशरश्च निवेशितः॥ ॥ विदू० चिठ्ठ दाव· द्रुमिणा· दंड
कट्ठेणः कंदप्पवाहिं एणसद्दस्सं· इति दंडकाष्ठमवलंब्य चूतांकुरं पातयितु मिच्छति० राजा· स
सस्मितं० भवतु· बं ब्रह्मवर्चसं· सखे कौपविष्टः प्रियायाः किं विद्दनुकारिणी षुलतासु दृष्टि वि हेरंब० ५५

लोभयामि · विदू० णं। आसण्णा · पाडिआरि आचदुरिआ · भवदा · संदिट्ठा · माधवीमंडवे० इमं ण्वेलं०
अट्टिवाहिस्सं० त्ति · तहिं · च · मे · चित्तफलअ · गहिंस हत्थः। लिहिअं · तत्त होदीए · सउंदलाए · पडि
किदं · आहिलि · राजा · ईशं हृदे विनोदस्थानं तत्तमेव मार्गमादेशय · विदू० इदो इदो भवं · उभौ
परिक्रामतः०। सानुमती अनुगच्छति · विदू० एसो मणिसिलापट्टअ सणाहो माहवीमंडवो उ
वहार रमणिज्जदाए · णिस्संसअं · साअदेण · विअ णो पडिच्छदि ता · पविसिअ · णिसीदटु · भवं · उ
भौ प्रवेशं कृत्वोपविष्टौ० सानु० लदा · सलिहिदा · देक्खिस्सं · दाव · सहीए पडिकिदिं तदो से०
भत्तुणो · बहुमुहं · अणुराओ · णिवेदयिस्सं · तथा कृत्वा स्थिता० राजा · सखे सर्वमिदानीं स्मरा

शा॰ना॰ मि॰ शकुन्तलायाः प्रथमवृत्तान्तं कथितवानास्मि भवतेच॰ सभवान्प्रसादेशवेलायांमत्समीपमुपगतो
५६ नासीत्॰ पूर्वमपि नत्वया कदाचित्संकीर्तितं॰ तत्रभवत्साः नाम काश्चिइहमिवविस्मृतवानसित्वं॰
विदू॰ण: विस्सु॰मरामि॰ विदु॰ सव्वं॰ कहिअं॰ अवसाणे॰ तुए॰ तु॰ ए॰ परिहास॰ विअप्पओ॰ एसो॰
56 ण॰ भूदत्थोत्ति॰ आचरिविदअं॰ म॰ एवि॰ मंदुप्पिंड बुद्धिणा॰ तह॰ एव्व॰ गहीदं॰ अहवा॰ भविदव्वदा॰
बलवदी॰ मानु॰ एवं एवेदं॰ राजा॰ व्याख्या॰ सखेत्रायस्वमां॰ विदू॰ भो॰ किं॰ एदं॰ अणुववणं॰ खु॰ ई
दिसं तुए॰ कदाविः सप्पुरिसा॰ सोअविद्धा॰ण॰ होंति॰ णं॰ प्पवादेविणिक्कंपा॰ गिरिओ॰ राजा॰व
यस्यनिराकरणाविक्लवायाः प्रियायाः समवस्थानमनुस्मृत्य॰ बलवद्शरणोस्मि॰ साहि॰ इतः प्र हेरंब॰
५६

त्यादेशात्स्वजनमनुगन्तुं व्यवसितामुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे॰ मुहुर्दृष्टिं बाष्पप्रक
कलुषामर्पितवतीमयि क्रूरे यत्तत्सा विषमिव शल्यं दहति मां॰ ८॥ सानुमती· अह्महे ·ईदिसी· सक
ज्जपरदा· इमस्स· संदावेण · अहं रमामि· विदू॰ भो· अत्थि मे· तक्को · केण· तत्तहोदी · आआस· चारिणा·
णीदेत्ति· राजा· कः पतिदेवतामन्यः परिमाष्टुं मुत्सहेत॰ मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुत
वानस्मि· न त्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशंकते· सानुमती· सम्मोहो॰ खु विह्म
अणिज्जो· ण· पडिबोहो· वि· जइ एव्वं · अत्थि· खु· समागमो · कालेण तत्तहोदीए॰ राजा॰
कथमिव· विदू॰ ण॰ खु· मादा॰ पिदरा · भत्तुविओअ· दुःखिदं॰ दुहिदरं॰ देक्खिदुं पारेति· राजा॰

शं·ना० वयस्य·स्वप्नोनुमायानुमतिभ्रमोनुक्लिष्टं नुतावत्फलमेवपुण्यं०असन्निवसैतदतीतमेतेमनोर
५७ थानामतटप्रपाताः॥ १०॥ विदू० मा·एव्वं·अंगुलीअअंएव्व·णिदंसणं·अवस्सं भावी अचिंतणि
57 ज्जोसमाअमोहो दिति·राजा·अंगुलीअअंविलोक्य अयेइदं तावदसुलभस्थानभ्रंशिशोच
नीयं·तवसुचरितमंगुलीयनूनं प्रतनुममेव विभाव्यतेफलेन० अरुणानखमनोरमासुत
स्याश्च्युतमसिलब्धपदं पदं गुलीषु·॥१०॥ सानु० जई·अण्णहत्थे० गदं भवे·सच्चंएव्व·सोअणि
ज्जंभवे·विदू०भोइयं णाममुद्दाकेणउद्देसेणतत्तहो दीएवत्थुस्मासं.पाँयासबाष्पमाहु०दि
पञ्चिरेणार्यपुत्रप्रतिपत्तिंद्रास्यतीति·विदू० तदोतदो० राजा०पश्चादिमांमुद्रांतदंगुलौनिवेश हेरंब०
२ विदाः माहनु० मम वि·कोदूहल्लेणआकारिदो एसो·राजा·श्रूयतां·यदास्वनगराय प्रस्थितं मां प्रि+२ ५७

यता मयापि प्रत्यभिहिता· एकैकमत्रादिवसे दिवसे मदीयेनामाक्षरं गणय गच्छसि यावदंतं· तावत्प्रि
ये मदवरोधगृहप्रवेशनेता जनस्तव समीपमुपेष्यतीति· ॥१२॥ तच्च दारुणात्मनामया मोहान्ना
नुष्ठितं– सानु॰ रमणीओ· खु· अवही· विहिणा· विसंवादिदो· विदू॰ कहं· धीवल· कप्पि अस्स॰
लोहिअ· मच्छस्स· उदलब्भंतरे· आसि· राजा· शचीतीर्थे वंदनायाः सख्यास्ते हस्तात्गंगायां भ्रष्टमि
ति भवदुक्तं॰ विदू॰ जुज्जइ॰ सानु॰ अदो॰ एव्व· तवस्सिणीए॰ सउंदलाए· अधम्मभीरुणो इमस्स॰
राए सिणो: परिणए· संदेहो· आसि॰ अहवा॰ ईसिदिसो· अणुराओ· अहिण्णाणं· पेक्खिवा
दि॰ कहं॰ वि अ॰ एदं· राजा· उपालप्स्ये तावदिदं अंगुलीयकं· विदू॰ आत्मगतं· गहिदो· अणेण

श०ना० पंथा॰ उम्मत्तआएं राज्ञा॰ कथंनु तं बंधुरकोमलांगुलिं करं विहाया सितिमानमंमासि० अथवा अचे
५८ तनां नामगुएं नलक्षये न्मयैवकस्माद्व धीरितापि या ॥१३॥ विदू० आत्ता जगतं॰ कहं॰ बुभुरखा
58 ए० खादइदद्वो हि राज्ञा॰ अकारणपरित्सक्ते अनुशयितहृदयस्तावदनुकम्प्यतामयं जनः पु
नर्दर्शनेन॰ प्रविश्य पटाक्षेपेण चित्रफलहस्ता चतुरिका॰ इयं चित्रगता भट्टिणीति चित्रफ
लकं दर्शयति० विदू० साहुव अस्स॰ मऊरावत्था णदंसणीज्जो भावानुप्पवेसो खलदि० वि अ
मे॰ दिट्ठी॰ णिणो॥ अ॰ प्पदेसेसु०सानुअस्मो॰ एसा॰ राएसिलो॰ णिउणदा॰ जाणे॰ सही अग्गदो
मे॰ वट्टदित्ति॰ राजा॰ यद्यत्साधुनचित्रे स्यात्क्रियते तत्तदन्यथा॰ तथापि तस्या लावण्यं रेखया किं हेरंब०
५८

चिदन्वितं ।१२७॥ सानु॰ सरिसं । एदं॰ पक्का । दाव । गुरूणो । सिणेहस्स॰ अणवलेवस्स॰ अ । विदू॰ भोदा
णिं । तिणि । णलहोद्दीओ । सद्धा । अ । दंसणीआओ । कदमा । एस्स । णनहो द्दीसउंदला । सानु । अण
भिणीखु । ईदिसस्स: रूवस्स: मोक्कः दिट्ठी । अ अ॰ जणा, राजा । लतावल्कलमांतर्कयसि । विदू॰ तव्वे मि॰
णाए सा । सिढिलकेस । बंधुवींत । कुसुमेण । केसंतेण । उम्भिपा । से अ॰ बिंदुणावअणेण: विसेस
द्दो ओसारि आहिं । बाहाहिं । अ वसे अ । सिलिद्ध । तरूपापक्कवस्स । चूद॰ पाअवस्स: पासे । ईसि॰
परिसंता॰ विअ । आलिहिदा । एसा सउंदला । दुदिराओ । यहिओ । राजा । दिपुणोभवान्: अस्स
त्रमेभावचिह्नं: स्विन्नांगुलिविनिवेशो रेखाप्रांतेषु दृश्यते मलिनः । अश्रु च कपोलपतितं दृश्य

शा·ना· मिदं वर्त्तिकोच्छ्वासात्।।१५।।चतुरिके अर्धालिखितमेतद्विनोदस्थानं तस्माद्गच्छ वर्त्तिकां ताव
५८ दानयः चतुरिका· अज्ज माढव्व· अवलंब· चित्तफलअं· जाव· आअच्छामि· राजा· अहमेवैतदव
लंबे मयोक्तं करोति· निष्क्रान्ता चेटी· राजा· अहं हि· साक्षात्प्रियामुपगतामपहाय पूर्वं चित्रार्पि
59 तां पुनरिमां बहुमन्यमानः· स्रोतोवहां पथि निकामजलामतीत्य जातः सखे प्रणयवान्मृगतृष्णि
कायां।।१६।। विदू· आत्मगतं· एसो· अत्तभवं· णदिं· अदिक्कमिअ· मिअतिण्हिआए· संकंतो·
प्रकाशं· भो· अवरं किं एत्थ· लिहिदव्वं· सानु· ओ: जो· पदेसो· सही· सो· सहीए· अधिरूवो· तं तं· आ
लिहिदुकामो· भवे· राजा· श्रूयतां· कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी पादास्तामभि हरेब०
५८

तोनिबएहरिणा गौरीगुरोः पावनाः शाखालंबितवल्कलीस्य चतरोर्निर्मातुमिच्छाम्यधः शृंगेकृष्णम
गस्य वामनयनं कंडूयमानांमृगीं ॥१७॥ विदू० आत्मगतं · जह · अहं · देरस्वामि · पूरिदव्वे · अलेण० चि
तफलअं · लंबकुच्चाराण · तावसाणं · कदुंबेहिं० राजा · वयस्य · अन्यच्च शाकुंतलायाः प्रसाधनमभि
प्रेतं अत्र विस्मृतमस्माभिः · विदू० किंवि अ · सानु० वणवासस्स · सोउमारस्स अ · विणअस्स अज्जे
सरिसं · भविस्सदि · राजा · कृतं नकर्णार्पितबंधनं सखे शिरीषमागंडविलंबिकेसरं · नवा शरच्चंद्रम
रीचिकोमलं मृणालसूत्रं रचितं स्तनांतरे ॥१८॥ विदू · भो · किंएदुतत्तहोदी · रत्तकुवलयपल्लवसोहिणा अ
ग्गहत्थेण · ओहारि · अ · यद्दचद्दा · चिअट्ठिदा · सावधानां निरूप्य · दृष्ट्वा · आ · एसो · दासीसुदो · कुसु

शा॰ना॰ मरसः पाश्चलो॰ अज्जहोदीए॰ वअणं॰ अहिलं घदि॰ मुद्धअरो॰ राजा॰ ननु वार्यतामेष धष्टः॰ विदू॰ भवं॰
६० एव्व॰ अविणीदाणं॰ सासिदा॰ द्रुमस्स वारणो॰ पहविस्सदि॰ राजा॰ युज्यते॰ अयि भो॰ कुसुमलताप्रि
60 यातिथे कमत्र परिपतनखेदमनुभवसि॰ एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता॰ प्रति
पालयति मधुकरी न खलु मधु विना त्वया पिबति॰ ॥१९॥ सानु॰ अज्ज अभिजादं॰ एसो॰ वारिदो॰
विदू॰ पडिसिद्धा वि माए साजादी॰ राजा॰ एवं मोन मे शासने तिष्ठति॰ श्रूयतां तर्हि संप्रति॰ अक्लिष्ट
बालतरुपल्लवलोभनीयं पीतं मया सदयमेव रतोत्सवेषु॰ बिंबाधरं स्पृशसि चेद्भ्रमर प्रियायाः
त्वां कारयामि कमलोदरबंधनस्थं ॥२०॥ विदू॰ एवं तीरक्खदा दंडस्स॰ किण भाइस्सदि॰ प्रह हेरंब॰
६०

स्याम्म गतं·एसो दाव उम्मत्तो अहं वि एदस्स· संगेण ·ईदिस· जणो वि असंवुत्तो। प्रकाशं·भोचि
त्तं खु एदं·राजा·कथं चित्रे·सानु०अहं वि·दाणिं·अवगदत्था·किं उण·जहालिहिदानुभावी ए
सो·राजा·वयस्य किमिदमनुष्ठितं पौरोभाग्यं·दर्शीनसुखमनुभवतः साक्षादिव तन्मयेन
हृदयेन·स्मृतिकारिण्या त्वया मे पुनरपि चित्रीकृता कान्ता॥२१॥ बाष्पं विरहति·सानु०पुच्छा
पर विरोही अपुव्वो एसो विरहमग्गो·राजा·वयस्य कथमेवमविश्रान्तदुःखमनुभवामि·
प्रजागरात्खिलीभूतस्तस्याः स्वप्ने समागमः बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि॥२२॥
सानु०सव्वहा·पमज्जिदं·तुए·पच्चादेसदुःखं समुद्दंतला ए·प्रविश्य चतुरिका·जेदु·भट्टा०

श्री·ना० वट्टिका·करंडअं·गेह्लिअ० इदो मुहं पस्थिदह्मि·राजा·किं वाचतुरिकं·चतुरीका·सामे हत्या दो०
६१ अंतरा·तरलिआ·दुदिआए·देवीए·वसुमदीए० एदं अहं एव्व·अज्जउत्तस्स·उवणाइस्संति·
सवलक्करं० गहिदो० वि० दिट्ठिआ० तुमं० मुक्का·चलु० जाव देवीए विडवलगं उत्तरीअं·तरा
लिआ·मोचेदि० ताव·मए० । लिप्पाहि ह्या दो० अत्ता·राजा·वयस्य उपस्थिता देवी बहुमानग
र्वितास्व० भवानिमां प्रतिकृतिं रक्षतु·विदू० अत्ता एां तिं० भणाहि·चित्रफलकमादाय ोथ्या
पच्चइ भवं अंतेउरकालकूया दो० मुचीअदि० तदो·मं मेह·पडिच्छंदो·पासादं० सद्दा
वेहि·इतिदुतपदं निष्क्रांतः·मानु० अएसंकंतः·हि अओ विप ठमसंभावणं·आवेरखा हेरं ब०
६१

दि॰ आसिढिल सोहद्दो· द्वालिं एसो· प्रविश्य पत्रहस्ता प्रतीहारी· जेदु देवो· राजा· वेत्रवति· नख
त्वंतरादृष्टात्तया देवी प्रज्ञी॰ अहदं॰ पत्तहत्थं मं· देक्खिअ· पडिणिउत्ता· राजा· कार्यज्ञा
कार्योपरोधं मे परिहरति· प्रती॰ देव अमच्चो· विण्णवेदि॰ अत्थजादस्स· गणणा बहुलदाए·
एक्कं पोरकज्जं· तं देवो पत्तारूढं पच्चक्खी करेदु त्ति: राजा· इतः पत्रिकां दर्शय· प्रतीहारी उप
नयति· राजा· अनुवाच्य· कथं समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः·
अनपत्यश्चाकिल तपस्वी· राजगामी तस्यार्थसंचय इत्येतदमात्येन लिखितं· कष्टं खल्व
नपत्यता· बहुधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यं· विचार्यतां यदि काचिदापन्नसत्त्वा त

शा·को० स्वमायो सुस्यात्० प्रती० देवदाणीं · एव्व · साकेतअस्स · सेट्ठिणो दुहिआ · णिव्वुत्त० पुंसवणाः जा
६२ ननु गर्भः पित्र्यं रिक्थमर्हति · गच्छ एवममात्यं ब्रूहि · प्रतीहारी · जं देवो आणवेदित्ति · प्रस्थिता · राजा ·
एहि तावत्० प्र० इयं म्हि · राजा · किमनेन संततिरस्ति नास्तीति० येन येन वियुज्यंते प्रजाः स्निग्धेन
62 बंधुना० स स पापादृते तासां दुष्यंत इति घुष्यतां ॥ २२ ॥ प्रती · एवं · णाम · घोसइदव्वं निष्क्रम्य पु
नः प्रविश्य काले · पवुट्ठं विअ · उद्दविअ · अहिणंदिदं · देवस्स सासणं · राजा · दीर्घमुष्णं
च निश्वस्य० एवं भो संततिच्छेदनिरवलंबानां कुलानां मूलपुरुषावसाने संपदः परमुपतिष्ठं
ति० ममाप्यंते पुरुवंशश्रीरकाल इवोप्तबीजा भूरेवं प्रवृत्ता · प्रती० पडिहदं · अमंगलं · राजा · धि हेरंब०
६२

ञ्जमुपस्थितश्रेयोवमानिनं · सानु० असंसअं · साहं एव्व · हिअ एक्करिअ · णिंदिदो ० णेला · अप्पा ·
राजा · स्वरोपितेथात्मनिधर्मपाल्लीस्यत्कामयानाम कुलप्रतिष्ठाः कात्यिष्यमाणामहतेफलाय
वसुंधरा कालइवोप्तबीजा · २३ सानु० अपरिक्खिआद्दाणिंदे संदद्दी भविस्सदिं · चतु० ञ
नांतिकं० अये इमिणा सत्यं वाहवुत्तंतेण · विडलावेअं भट्टाणं · अस्स सिदुं० मेहूपडिच्छं
दाद्दो · अज्जे माठवे · गाहिअ · आअच्छामि · प्रती० सुहु भणासि · इतिनिष्क्रांता · राजा · अहो
दुष्यंतस्य संशयमारूढाः पिंडभाजः० कुतः · अस्मात्परंबलयथाश्रुतिसंभृतानि कोनः कुले
निवपनानि नियच्छतीति० नूनं प्रसूतिविकलो कः समस्स दुभट्टा · सानु० हन्धी · सहि खु · द्दी

श॰ ना॰ बे॰ वव धाएेण॰ एसो अंधआर॰ दोसे॰ अण्णुहोदि॰ सवेसी॰ अहं दाणिं॰ एव॰ णिछुदं॰ करेमि॰ अह
६३ वा॰ सुदं॰ मए॰ सुदं उदत्तं॰ समस्सास अंती॰ए॰ महेंद॰ जणणीए॰ मुह्णादो॰ जणा॰ भाउ स्सुआ
दे॰ वाएच्च तह अनुचिट्ठि सेत्ति॰ जह अद्दरेण धमंमपदिणं महा अभिणं दिस्सदित्ति ताए,
63 अुत्तं काले॰ पडियालिदुं जाव॰ इमिणा वुत्तंतेण पि असहं समस्ससे मि॰ उद्भ्रांत के न निष्क्रां
ता॰ नेपथ्ये॰ अब्रह्मण्यं २ राजा कर्णं दत्त्वा अपे माढव्य स्येवार्त्त स्वरः कः को नु भोः प्रविश्य प्रती
हारी॰ परित्ता अदु॰ देवो संसदं॰ गअं व असं॰ राजा॰ केनात्तगंधो माणवकः॰ प्र॰ अदिट्ठरूवे
ण केणा वि सत्ते ण॰ अदिक्कमिअ मेहपडिछंदस्स॰ पासाहस्स॰ अग्गभूमिं आरोविदो॰ राजा हेरंब॰ ६३

उत्थाय मामात्मावत् · ममापि सत्वैरभिभूयन्ते गृहाः अथवा · अहन्यहन्यात्मन एव तावज्ज्ञातुं प्रमाद
स्खलितं न शक्यं · प्रजासु कः केन पथा प्रयातीत्याशेषतो वेदितुमस्ति शक्तिः ॥ २५ नेपथ्ये · भो व
अस्स अविहं २ राजा गतिभेदेन परिक्रामन् सखे न भेतव्यं नेपथ्ये · पुनः तदेव पठित्वा · कहं ण
माइस्सं · एस मं को वि पच्छावणदसिरोहरं · दूसायं · विअ · तिस्खं उं · भंगं करेदि · राजा सदृष्टिक्षे
पं · धनुस्तावत् प्रविश्य शार्ङ्ग · हस्ता यवनिका · भट्टा एदं हत्थावापसहिदं सरासणं · राजा सशरं ध
नुरादत्ते · नेपथ्ये · एष त्वामभिनवकण्ठशोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानं · आर्तानां
भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीं ॥ २६ ॥ राजा · सरोषं · कथं मामेवोद्दिश्य

शा॰ना॰ ति॰ लिप्त्वकुणपाशन त्वमिदानीं न भविष्यसि। शार्ङ्ग॰ मारोप्य। वेत्रवति सोपानमार्गमादेशय। प्र॰
६६ इन्द्रो देवो॰ सर्वे ससंभ्रमं उपसर्पन्ति॰ राजा। समन्तादवलोक्य। शून्यं खल्विदं॰ नेपथ्ये। अविहर अत्त
भवंतं पेरेक्खामि। तुमं। मं ण पेरक्खामि। विडालगहिदो मूसओ विअ। णिरासो म्हि। जीविदे संवु
64 त्तो। राजा। भोस्तिरस्करिणीगर्वितं॰ मदीयं शस्त्रं त्वां द्रक्ष्यति। एष तमिषुं संदधे। यो हनिष्यति वध्यं
त्वां रक्ष्यं रक्षति च द्विजं॰ हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः॥२७॥ शास्त्रं च संधत्ते। ततः प्रविश
ति विदूषकमुत्सृज्य मातलिः। मातलिः। कृताः शरव्या हरिणा त्वनासुराः शरासनं तेषु विकृ
ष्यतामिदं॰ प्रसाद सौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाः शराः॥२८॥ राजा अस्त्रमु हेरंब॰ ६६

पसंहर अपेमाललिः स्वागतंमहेंद्रसारथे॰ प्रविश्य॰विदूषकः॰॰ अहंजे एइट्ठि॰पशुमारंमारिदो सो
इमिणा सा अदेए॰अहि एंद्दी अदिं॰ मातालिः॰स स्मितं॰ आयुष्मनूश्रूयतां॰यदस्मिहरिंणाभवत्स
काशं प्रेषितः राजा अवहितोस्मि॰मातालिः॰ अस्ति कालेनेमि प्रसूतिर्दुर्जयो नाम दानवगणः राजा
अस्तिश्रुत पूर्वंमया नारदात्॰ मातालिः॰ सख्युस्ते सकिल शतक्रतोरवध्यस्य त्वंरणशिरसि
स्मृतो निंहंता॰उच्छेत्तुंप्रभवत्तियन्न सप्तसप्तिस्तन्नैशंतिमिरमपाकरोतिचंद्रः॥२९॥ सभवाना
त्तशास्त्र एव मिदानींतमैंद्ररथमारुह्यविजयाय प्रतिष्ठतां॰राजा॰अनुगृहीतो महमनया मघव
तः संभावनया॰अथमाठव्यंप्रतिभवताकिं मेवंप्रयुक्तं॰मातलिः॰तदपिकथ्यते॰किंचिन्निमित्ताद

श०ना० पिमनः संतापादायुष्मान्मया विक्लवो दृष्टः पश्चात्कोपयितुमायुष्मंतं तथा कृतवानस्मि। कुतः०
६५ ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते। प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते हि ज
नः॥२०॥ राजा जनांतिकं० वयस्य अनतिक्रमणीया दिवस्पते राज्ञा तदत्र परिगतार्थं कृत्वा माम
65 द्वचनादमात्यपिशुनं ब्रूहि। त्वन्मतिः केवला तावत्परिपालयतु प्रजाः। अधिज्यमिदम
न्यस्मिन्कर्मणि व्यापृतं धनुः॥२१॥ वि० जं भवं आणवेदि त्ति। निष्क्रांतः। आयुष्मान्रथमारोह
तु० राजा० रथारोहणं नाटयति। इति निष्क्रांताः सर्वे। षष्ठोऽंकः॥६॥ ततः प्रविशत्याकाशयानेन
रथारूढो राजा मातलिश्च। राजा। मातले। अनुष्ठितनिर्देशोऽपि मघवतः० सत्क्रियाविशेषादनु हेरंब० ६५

पपुत्कृभि वात्मानं समार्धये· मातलिः· सस्मितं· आयुष्मन्नुभयमपरितोषं समर्धये· प्रथमोपकृतं

तं मरुत्वतः· प्रतिपत्त्या लघुमन्यते भवान्· गणयत्यवदानविस्मितो भवतः सोपि न सत्क्रियागुणा

न्·।।राजा· मातले मामैवं· स खलु मनोरथानामथभूमिर्विसर्जनावसरसत्कारः· मम हि दि

वौकसां समक्षमर्धासनोपवेशितस्य· अंतर्गतप्रार्थनमंतिकस्थं जयंतमुद्वीक्ष्य कृतस्मिते

न· आमृष्टवक्षो हरिचंदनांका मंदारमाला हरिणापिनद्धा· मातलिः· किमिव नायुष्मा

न् अमरेश्वरान्नार्हति· पश्य· सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकंटकं· त

व शरैरधुनानतपर्वभिः पुरुषकेसरिणश्च पुरा नखैः।।३।। राजा· अत्र खलु शतक्रतोरेवम

श॰ना॰ महिमास्तुत्यः॰सिध्यंति कर्मसु महत्स्वपि यन्नियोज्याः संभावनागुणमवेहि तमीश्वराणां किंवाभवि
६६ ष्यदरुणस्तमसां विभेत्ता तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्॥४॥ मातलिः॰ सदृशमेवैतत्॰
स्तोकमंतरमतीत्य आयुष्मान्नितः पश्य नाकपृष्ठगतस्य सौभाग्यमात्मयशसः॰विच्छित्तिशे
66 षैः सुरसुंदरीणां वर्णैरमी कल्पलतांशुकेषु॰संचिंत्यगीतक्षममर्थजातं दिवौकसस्त्वच्चरि
तं लिखंति॥५॥ राजा॰ मातले असुरसंप्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न लक्षितः
स्वर्गमार्गः॰कतरस्मिन्मरुतां पथि वर्तामहे॰ मातलिः॰त्रिस्रोतसं वहति यो गगनप्रतिष्ठां ज्योतीं
षि वर्तयति च प्रविभक्तरश्मिः॰तस्य द्वितीयहरिविक्रमनिस्तमस्कं वायोरिमं परिवहस्य वदं हरब॰
६६

ति मार्गे ॥६॥ राजा: मातले अत: खलु सबाह्यांत: करणो ममांतरात्मा प्रसीदति · रथांगमवलो
क्य मेघपदवीमवतीर्णौ स्व: · मातलि कथमवगम्यते · राजा · अयमरविवरेभ्यश्चातकैर्निष्पतद्भि
र्हरिभिरचिरभासां तेजसा चानुलिप्तै: । गतमुपरि घनानां वारिगर्भोदराणां पिशुनयति रथस्ते
शीकरक्लिन्ननेमि: ॥७॥ मातलि: · क्षणादायुष्मान्स्वाधिकारभूमौ वर्तिष्यते · राजा · अधोवलो
क्य वेगावतरणादाश्चर्यदर्शन: संलक्ष्यते मनुष्यलोक: तथाहि · शैलानामवरोहतीव शि
खरादुन्मज्जतां मेदिनी पर्णाभ्यांतरलीनतां विजहति स्कंधोदयात्पादपा: संतानैस्तनुभाव
नष्टसलिला व्यक्तिं भजंत्यापगा: केनाप्युत्क्षिपतेव पश्य भवनं मत्पार्श्वमानीयते ८ मा० साधु

शा॰ना॰ दृष्टं ·सबहुमानम लोक्य: अहो उदाररमणीया पृथिवी· राजा· मातले· कतमो यं पूर्वापरसमुद्रावगा
६७ ढ: कनकरसनिष्यंदी सांध्यइवमेघपरिघ: सानुमानावलोक्यते· मा॰ आयुष्मन्नेष खलु हेमकू
टो नामकिंपुरुषपर्वत: तपसांसिद्धिक्षेत्रं पश्य· स्वायंभुवान्मरीचेर्य: प्रबभूवप्रजापति: सु
67 रा गुरु: सोऽस्मिन सपत्नीकस्तपस्यति:९॥ राजा· तेनहि अनतिक्रमणीयानि श्रेयांसि· प्रदक्षि
णीकृत्य भगवंतं गंतुमिच्छामि· मा॰ प्रथम: कल्प: · नाट्येनावतीर्णौ· रथा: राजासविस्मयं· उ
पोढशब्दा न रथांगनेमय: प्रवर्तमानं न च दृश्यते रज: · अभूतलस्पर्शतया निरुंधतस्तवा
वतीर्णोपि न लक्ष्यते रथ: ॥१०॥ मा· एतावानेव शतक्रतोरायुष्मतश्च विशेष: राजा· मातन हेरंब॰ ६७

ले कतमस्मिन्प्रदेशे मारीचाश्रमः। मातलिः। हस्तेन दर्शयन् वल्मीकाग्रेनिमग्नमूर्तिरुरसा संदष्ट
सर्पत्वचा कण्ठे जीर्णलताप्रतानवलये नात्यर्थसंपीडितः। अंसव्यापि शकुन्तनीडनिचितं बि
भ्रज्जटामण्डलं यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः॥ ११॥ नमोऽस्मै कष्टतपसे। मा०
संयतप्रग्रहं कृत्वा। महाराज एतावदितिपरिवर्धितमन्दारवृक्षं प्रजापतेराश्रमवृक्षं प्रविष्टौ स्वः।
राजा। स्वर्गादधिकतरं निर्वृतिस्थानं अमृतह्रदमिवगाढोऽस्मि। मा० रथं स्थापयित्वा अवत
रत्वायुष्मान्। राजा। अवतीर्य। मातले भवान्कथमिदानीं। मा। संयन्त्रितो मया रथः अहमप्य
वतरामि। तथा कृत्वा इत आयुष्मन् दृश्यतामत्रभवतामृषीणां तपोवनभूमयः। राजा ननु

श· ना॰ विस्मयादिव लोकयामि· प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने तोये कांचनपद्मरेणुक
६८ पिशे धर्माभिषेकक्रियाः· ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो यत्कांक्षंति तपो
भिरन्ये मुनयस्तस्मिन्तपस्यमी ॥१२॥ मा॰ उपर्युपरि धावंती उत्सर्पिणी खलु महतां प्रा
68 र्थना· परिक्रम्य आकाशे· अयि वृद्धशाकल्य किमनुतिष्ठति भगवान्मारीचः· किं ब्रवीषि दा
क्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहिताय कथयतीति· राजा
तर्हि प्रतिपाल्यावसरः खलु मुनयः· मा॰ राजानमवलोक्यास्मिन्नशोकवृक्षमूले तावदास्ता
मायुष्मान्यावत्त्वामिंद्रगुरवे निवेदयितुमंतरान्वेषी भवामि· राजा यथा भवान्मन्यते· स्थितः मा॰ हेरंब॰ ६८

आपुच्छा म्साधयाम्यहं· निष्क्रांतः· राजा निमित्तं सूचयित्वा· मनोरथाय नाशंसे किं बाहो स्पंदसे वृथा·
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्त्तते॥२३॥ नेपथ्ये· मा खु चापलं करेहि· कहं गदो एव्व अत्त
णोपकिदिं· राजा कर्णं दत्वा· अभूमिरियमविनयस्य· को नु खल्वेष निषिध्यते· शब्दानुसा
रेण अवलोक्य· सविस्मयं· अये को नु खल्वयमनुबध्यमानस्तपस्विनीभ्यामबालसत्वो बालः॰
अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरं· प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति॥२४॥ ततः प्रविश
ति यथा निर्दिष्टकर्मा तपस्विनीभ्यां सह बालः· बालः जिंभ· सिंघ दन्ता· इं दे· गणइस्सं· प्रथम॥
अविणीद किंणो· अपच्चणिव्विसेसाणि सत्ताणि· विप्पआरेसि· संहन्तवद्दइ· देसरंमो· ठाणे

श·ना० खुद्द· सिंजलीएण्व्वे सेद्द मणो त्ति· किं दत्ताम हे० अंसि· राजा· येँ नु खलु बाले स्मि न्नौरस इव पुत्रे स्नि
६९ ह्यति मम मनः· नूनमनपत्यता मां वत्सलयति· द्वितीया: एसा खु केसरिणी तुमं लंघेदि· जइ से पु
त्तअं न मुंचेसि· बालः सस्मितं० अत्ते हे बलिअं भीदो म्हि· अधरं दर्शयति· राजा महतस्ते ज
69 सो बीजं बालको संप्रति भाति मे· स्फुलिंगावस्थया वह्निरेधापेक्ष इव स्थितः॥१५॥ प्रथमा· वत्स ए
दं बालमइंदअं· मुंच अवरं दे कीलणअं दाइस्सं· बालः कहिं· देहि एणं· हस्तं प्रसारयति· राजा· क
थं चक्रवर्तिलक्षणं अनेन धार्यते· तथा ह्यस्य· प्रलोभ्य वस्तु प्रणय प्रसारितो विभाति जालग्रथि हरेवं
तांगुलिः करः· आलक्ष्य पत्रान्तरमिद्धरागं नवोषसा भिन्नमिवैक पंकजं॥१६॥ द्वितीया· खु ६९

बद्धेण सक्को एसो वाआमेत्तेण · विरमाविदुं · गच्छ तुमं ममके रए उडए · मक्कंडस्स · इसिकुमारस्स
स्स · वण्णचित्तिदो · मित्तिआमोरओ चिट्ठदि तं से उवहर · प्रथमा · तह इति निष्क्रांता · बालः इमि
णा एव्व दाव कीलिस्सं · तापसी विलोक्य हसति · राजा · स्पृहयामि खलु दुर्ललितायास्मै · आ
लक्ष्य दंतमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन् · अंकाश्रयप्रणयिनस्त
नयान्वहंतो धन्यास्तदंगरजसा मलिनीभवंति ॥ १७ ॥ तापसी · होदु · ण मं अअं गणेदि · पा
र्श्वमवलोकयति · को एत्थ इसिकुमाराणं · राजानमवलोक्य · भद्दमुह · एहि दाव मोएहि · इमि
णा दुम्मोदं हत्थगाहेण · डिम्भलीलाए बाधीअमाणं · बालमइंअं · राजा · उपगम्य · सस्मि

श. ना. तं. अपि भो महर्षिपुत्र. एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया. सत्त्वसंश्रयसु
७० खोपि दूष्यते कृष्णसर्पाशिशुनेव चंदनः॥१८॥ तापसी. भद्दमुह. एहि अअं इसिकुमार ॐ.
राज्ञा. आकारसदृशं चेष्टितमेव कथयति. स्थानप्रत्ययात्तु वयमेवं तर्किणः यथाभ्यर्थितमनुति
70 ष्ठन् बालस्य स्पर्शं उपलभ्य. आत्मगतं. अनेन कस्यापि कुलांकुरेण स्पृष्टस्य गात्रेषु सुखम
मैवं. कां निर्वृतिं चेतसि तस्य कुर्याद्यस्यायमंगात् कृतिनः प्रसूतः॥१९॥ तापसी. उभो णिव्वण्णेधः
अबारिअं. राज्ञा. आर्ये किमिव. तापसी. इमस्स बालअस्स. रूवसंबंधसंवादिणी आकि हरं कं
दिति. विह्माविदह्मि. अपरिचिदस्स वि दे. अपडिलोमो संवुत्तो. राजा. बाल्यादुपलाल्य ७०

न्तः नंचे मुनिकुमारोपं· अथकोस्यस्थं पदृशः· तापसी ·पुरूवंसो· राजा· आत्मगतं· कथमेकान्वयो

मम· अतः खलु मदनुकारिणमेनमत्रभवतीमन्यते· अक्षिप्तसौरवाणामंसंकुलव्रतं· भवनेषुरसा

धिकेषुपूर्वं क्षितिरक्षार्थमुशंतियेनिवासं· नियतैकयतिव्रतानिपश्चात्तरुमूलानिगृहीभवंति

तेषां ॥२०॥ प्रकाशं· नपुनरात्मगसीमानुषाणामेषविषयः· तापसी· जहभट्टमुहोभणादि· अ

ह्सरासंबंधे णाइमस्सवालस्सजणणीए स्थदेवगुरूणोतवोवणोपस्सूदा· राजा· अपवार्य· इ

तद्वितीयमाशाजननं· प्रकाशं· मातःअत्रभवती किमास्थस्यराजर्षेःपत्नी· तापसी· कोतस्सधम्म

दारपरिग्गाहिणोणामसंकीर्तिदुं चिंतिस्सदि· राजा स्वगतं· इयं खलु कथामामेव लक्षीकरो

श॰ना॰ ति॰ यदि तावदस्य शिशोर्नामतो मातरं पृच्छामि॰ अथवा॰ अनार्यः परदारव्यवहारः॰ प्रविश्य मृन्म
७१ यूरहस्ता तापसी॰ तापसी॰ सव्वदमण॰ सउंदलावण्णं पेक्ख॰ बालः॰ सदृष्टिक्षेपं॰ कहिं वा मे
अज्जू॰ उभे॰ णामसारिच्छेण वंचिदो माउवच्छलो॰ द्वितीया॰ वच्छ इमस्स मित्तिआमओरस्स॰
७१ रम्मत्तणं देक्खत्ति भणिदो सि॰ राजा॰ आत्मगतं॰ किं वा शकुन्तलेत्यस्य मातुराख्या॰ संति पुन
र्नामधेयसादृश्यानि॰ अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते॰ बा
लः॰ अज्जुए रोअदि मे एसो भद्दमोरओ॰ क्रीडनकमादत्ते॰ प्रथमा॰ विलोक्य सोद्वेगं॰
अह्महे॰ रक्खाकरंडअं से मणिबंधे ण दीसइ॰ राजा॰ अलमलमावेगेन॰ नन्विदमस्य सिं हेरंब॰ ७१

हृशवमई्ीत्पारिम्भटुं आदालुमिच्छति·उभे·मा खु रद्दुदं अवलॅंबिअ गहुं गाहिदे ऐोणा·विस्मयाहुरो
निहस्ते परस्परमवलोकयतः ·राजा·किमर्थं प्रतिषिद्धास्मः·प्रथमा· सुणादु॰ महाराओ ॲ एसा॰
अब्बराद्धि द्दा॰ णामओं सही द्दा·णामओं सही इमस्स·जादक्खसमये·प अवदा·मारीएणा॰
दिणाएदं किल·मादापिदरो अप्पाणं चवड्ढिअ·अवरो॰ भूमिपडिदं·णागेहूदि·राजा॰
अथ गच्छति·प्रथमा॰ तदो तं स पोभविअदं सई·राजा· भवतीभ्यां कदाचिदस्याः प्रत्लक्षीकृता
विक्रिया·उभे·अणेक सो॰·राजा·सहर्षमात्मगतं ·कथमिवसं पूर्णामपि मनोरथं नाभिनंदामि·
बालं परिषजते ·द्वितीया·सुवद्दे एहि·इमं वुत्तंतणिअमव्वाउड्डाए·मउंदलाएणिवेद्दह्म·इ

शा·ना०
७२

इति निष्क्रांते० बालः मुच मां जाव अज्जुए सआसं गच्छमि॰ राजा॰ पुत्रक मया सहैव मातरमभिनंदयिष्यसि:
बालः॰ मम तादो॰ दुस्संदो ण तुमं॰ राजा॰ सस्मितं॰ एष निषेध एव मां प्रसादयति॰ ततः प्रविशत्येक
वेणीधरा सउंदला॰ वि आरकाले वि॰ पकिदित्थं सव्वदमणस्स ओं सहिं सुणिअ॰ णम आसा॰ आसि॰
अत्तणो भाअधेएसु॰ अहवा॰ जह साणुमदीए॰ आचरिखदं तह संभावीअदि॰ एदं॰ राजा॰ शा
कुंतलां विलोक्य॰ अये सेयमत्र भवती शाकुंतला येषा॰ वसने परिधूसरे वसाना नियमक्षाममुखी
धृतैकवेणिः॰ अतिनिष्करुणस्य शुद्धशीला मम दीर्घविरहव्रतं बिभर्ति ॥२१॥ शकु० पश्चात्ता
पविवर्णं राजानं दृष्ट्वा॰ ण॰ खु अज्जउत्तो॰ विअ॰ तदो को एसो॰ दाणिं किदरक्खा॰ मंगलं हारअं

हेरंब०
७२

मे गत्तसंसग्गेण · दूसेदि · बालः · मातरं उपेक्ष्व · अज्जुए · एसो को वि पुरिसो · मं पुत्तेत्ति आलिंगेदि · रा
जा · प्रिये क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तं · यदहमिदानीं त्वया प्रत्यभिज्ञातमा
त्मानं पश्यामि · श० आ समगते० हि अअ · अस्ससस० परिच्चत्तः मत्सरेण अणुकंपिदह्मि देवेण०
अज्जउत्तो क्खु · एसो · राजा · प्रिये स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि · उ
परागान्ते शशिनः समुपागता रोहिणीयोगं ॥ २२ ॥ श० जे अज्जउत्तो इत्यर्धोक्ते बाष्पकंठी वि
रमति · राजा · बाष्पेण प्रतिषिद्धेपि जयशब्दे जितं मया० यत्ते दृष्टमसंस्कारपाटलोष्ठं पु
टं मुखं · ॥ २३ ॥ बालः० अज्जुए को एसो · श० वच्छ दे भाअधेआइं पुच्छ · राजा · शाकुंतला

शा॰ना॰ याः पादयोः प्रणिपत्य॰ सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते किमपि मनसः संमोहो मे तदा ब
७३ लवानभूत्॰ प्रबलतमसामेवंप्रायः शुभेषु हि वृत्तयः स्रजमपि शिरस्यंधः क्षिप्तां धुनोत्यहि
शंकया॥ २४॥ श॰ उट्ठेदु॰ अज्जउत्तो एण्णं मे सुअरि अथ डि बंध अंपुराकिदं तेसु॰ दिअसेसु
73 परिणाममुहं आसि जेण सानुक्कोसो वि॰ अज्जउत्तो मइ विरसो संवुत्तो॰ राजा॰ उत्तिष्ठति॰
श॰ अह॰ कहं अज्जउत्तेण॰ सुमरिदो दुःक्खभाई अअं जणे ग॰ राजा॰ उद्धृतविषादशल्यः क
थयिष्यामि॰ मोहान्मया सुतनु पूर्वमुपेक्षितस्ते यो बाष्पबिंदुरधरं परिबाधमानः तं ताव
दाकुटिलपक्ष्मविलग्नमद्य कांते प्रमृज्य विगतानुशयो भवेयं॰ २५ यथोक्तमनुतिष्ठति॰ शेरव॰
७२

श॰ नाम मुद्रां दृष्ट्वा· अज्जउत्त दइदं दे अंगुलीअअं· राजा· अस्मादंगुलीयोपलंभात्खलु स्मृ
तिरूपलब्धा· श॰ विसमं किदं णेण जं तदा अज्जउत्तस्स पच्चअकाले दुल्लहं आसि· राजा· ते
न हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमं· श॰ ण से विस्ससामि॰ अज्जउत्तो एव्व णं धा
रेदु· ततः प्रविशति मातलिः दिष्ट्या धर्मपत्नी समागमेन पुत्रमुखदर्शनेन चायुष्मान्वर्ध
ते· राजा· अभूत्संपादितस्वादुफलो मे मनोरथः। मातले न खलु विदितोऽयमाखंडलेन वृ
त्तांतः स्यात्· मातलिः विहस्य। किमीश्वराणां परोक्षं· एत्वायुष्मन्भगवान्मारीचस्ते दर्शनं वि
तरति॰ राजा· शकुंतले अवलंब्यतां पुत्रः· त्वां पुरस्कृत्य गंतुमिच्छामि भगवंतं· श॰ हिरिआ

शा॰ना॰ आम्हि अज्जउत्तेण सह गुरुसमीवं गंतुं। राजा। अयि आचरितं मे अभ्युदयकालेषु॰ एह्येहि सर्वे
७८ परिक्रामंति। ततः प्रविशत्यदित्या सार्धमासनस्थो मारीचः। मारीचः। राजानमवलोक्य॰ दाक्षा
यणि। पुत्रस्य ते रणशिरस्य यमग्रयायी दुष्यंत इत्यभिहितो भुवनस्य भर्त्ता। चापेन यस्य वि
७५ निवर्तितकर्मजातं तत्कोटिमत्कुलिशमाभरणं मघोनः॥२८॥ अदितिः। संभावणीयाणुभा
वा। से आकिदी। मातलिः। आयुष्मन्नेतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावा
युष्मंतमवलोकयतः। तावुपसर्प। राजा। मातले एतौ। प्राहुर्द्वादशधा स्थितस्य मुनयो य
त्तेजसः कारणं भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरं। यस्मिन्नात्मभवः परोपि पुरुषश्च हेरंब॰
७८

कै भवायास्वदृंद्वंद्वंदक्षमरीचिसंभवमिदं तत्स्रष्टुरेकांतरं ॥२७॥ मा० अथ किं· राजा· उभाभ्यामपि
वासवानुयोज्योड्डुष्यंतः प्रणमति· मारीचः· वत्स चिरं पृथिवीं पालय· अदितिः वत्स अप्पडिरहो
होहि· शा· दारअसहिदा वो पादवंदणं करेमि· मारी० वत्से· आखंडलसमे भर्ता जयंत
प्रतिमः सुतः· आशीरन्या न ते योग्या पौलोम्या सदृशी भव ॥२८॥ अदितिः· जादे भत्तुणो
अहिमदा होहि· वच्छ उहअकुलनंदणो होदु· उपविसह· सर्वे प्रजापतिमभितः उपविशं
ति· मारीचः· एकैकं निर्दिशन्· दिष्ट्या शकुंतला साध्वी सदपत्यमिदं भवान्· श्रद्धा वित्तं वि
धिश्चेति त्रितयं तत्समीपग ॥२९॥ राजा· भगवन्प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनं अतः अपूर्वः

शा॰ना॰ ७५ खलु वो नुग्रहः॰ कुतः॰ उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनंतरं पयः॰ निमित्त नैमि
75 त्तिकयो रयं क्रमस्तवप्रसादस्य पुरस्तात्संपदः॥३०॥ मातलिः॰ एवंविधातारः प्रसीदंति॰ राजा॰ भ
गवंतौ॰ इमामाज्ञाकरीं वो गांधर्वेण विधिनोपयम्य कस्यचित्कालस्य बंधुभिरानीतां स्मृति
शैथिल्यात्प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य॰ पश्चादंगुलीयकद
र्शनादूढपूर्वां तां दुहितरं अवगतोऽहं तच्चित्रमिव मे प्रतिभाति॰ यथा गजो नेति समक्षरूपे त
स्मिन्नतिक्रामति संशयः स्यात्॰ पदानि दृष्ट्वा तु भवेत्प्रतीतिस्तथाविधो मे मनसो विकारः॥३२॥
मारीचः॰ वत्स अलमात्मापचारशंकया॰ संमोहोपि त्वय्यनुपपन्नः॰ श्रूयतां॰ राजा॰ अवहितो हेरंब॰ ७५

स्मि॰ मारीचः॰ यदैवाप्सरस्तीर्थावतरणात्प्रत्यक्षशौचां शकुंतलां आदाय मेनका दाक्षाय
णीमुपगता तदैव ध्यानादवगतो ऽस्मि दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्र
तिदिष्टा नान्यथेति सचायमंगुलीयकदर्शनावसानः॰ राजा सोछ्वासं॰ एष वचनीयान्मुक्तो
ऽस्मि॰ श॰ स्वगतं॰ दिट्ठिआ अआरणपच्चादेशी ण अअंअज्जउत्तो॰ ण सत्तं अत्ताणं सुमंरेमि॰
अहवा पत्तो मये सहिसावो विरहसुण्णहिअआए ण वि दिट्ठो॰ यद्दो सहीहिं संदिट्ठम्हि भत्तु
णो अंगुलीअं दंसइद्दवं त्ति॰ मारीचः॰ वत्से चरितार्थासि॰ सहधर्मचारिणं प्रति न त्वया म
न्युः कार्यः॰ पश्य॰ शापादसि प्रतिहता स्मृतिरोधरूक्षे भर्त्तर्यपेततमसि प्रभुता तवैव॰ छाया

श·ना· नमृच्छति मलोपहृतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा ॥ ३२ ॥ राजा · भगवन्नत्र खलु मे वंशप्रति
७६ ष्ठा · इति बालं हस्तेन दर्शयति · मारीचः · तथा भाविनमेनं चक्रवर्तिनमवगच्छतु भवान् · पश्य · रथेना
नानुद्घातस्तिमितगतिना तीर्णजलधिः पुरा सप्तद्वीपां जयति वसुधामप्रतिद्वन्द्वः इहायं सत्त्वा
76 नां प्रसभदमनात्सर्वदमनः पुनर्यास्यत्यसौ ख्यां भरत इति लोकस्य भरणात् ॥ ३३ ॥ राजा · भगवता
कृतसंस्कारे सर्वमस्मिन्वयमाशास्महे · अदितिः · भअवनरमाए दुहिदुमणोरहसंपत्तीए क
ण्णो वि दाव सुदवित्थारो करीअदु दुहिदुवच्छला मेणआ इह एव्व उवचरंती तिष्ठति॰
श॰ स्वगत॰ मणोरहो खु मे भाणिदो भअवदीए · मारीचः · तपःप्रभावात्प्रत्यक्षं तत्रभवतः कण्वस्य · हेरंब॰
७६

राजा॰ अतः खलु ममनिःक्रोधो मुनिः॰ मारीचः॰ तथाप्यसौ प्रियमस्माभिः प्रष्टव्यः॰ कोत्र भोः॰ प्रविश्य
शिष्यः॰ भगवन्नहमस्मि॰ मारीचः॰ गालव इदानीमेव विहायसा गत्वा मद्वचनात्तत्रभवते कण्वा
यप्रियमावेदय॰ यथा पुत्रवती शकुंतला तच्छापनिवृत्तौ स्मृतिमता दुष्यंतेन प्रतिगृह्य नीतेति नि
ष्क्रांतः॰ मारीचः॰ वत्स त्वमपि स्वापत्यदारसहितः सख्युरार्खंडलस्य रथमारुह्य ते राजधानीं
प्रतिष्ठस्व॰ राजा॰ यदाज्ञापयति भगवान्॰ मारीचः॰ तत्र भवतु बिडौजाः प्राज्यवृष्टिः प्रजासु त्व
मपि विततयज्ञः स्वर्गिणः प्रीणयालं॰ युगशतपरिवर्त्तानेवमन्योन्यकृत्यैर्नयतमुभयलोका
नुग्रहश्लाघनीयैः॥ ३४॥ राजा॰ भगवन् यथाशक्ति श्रेयसे प्रयतिष्ये॰ मारीचः॰ किं ते भूयः प्रियमुप

श·ना० रोषिः राजा· अतः परं प्रियमस्ति· यदि भगवान् प्रसन्नः प्रियं कर्तुं इच्छति तर्हीदमस्तु· प्रवर्ततां प्रकृतिहि
७१ ताय पार्थिवः सरस्वती श्रुतिमहतां महीयसां· अमंगलं क्षपयतु नीललोहितः पुनर्भवं परिगतश
77 क्तिरात्मभूः॥३५॥ ॥इति निष्क्रान्ताः सर्वे सप्तमोंकः॥७॥ संवत् १८३१ श्री॥ ॥श्री॥ ॥श्री॥॥

हेरंब०
७१

१०६५